# संस्कृतप्रभातम्

## प्रार्थना

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नम: ॥

अहं कृष्णं नमामि स: वसुदेवस्य पुत्र: देवक्या: नन्दन: अस्ति । स: नन्द-गोपानाम् प्रिय: अस्ति तथा धेनू: इन्द्रियाणि च आनन्दम् ददाति एनम् कृष्णं पुन: नमामि।

## संपादकीय

प्रथमं भवत: हार्द स्वागतम् । गत जानेवारी मासे अस्माकं मन्दिरे संस्कृत भारती संस्थाया:संस्कृत संभाषण शिबीरम् अभवत्। तदनन्तरं अस्माकं संस्कृतभाषाया: अनुरागे ज्ञाने च वृध्दिम् अभवत्। अत: वयं श्रीश्री राधावृन्दावनचन्द्र मन्दिर प्रशासनं विशेषत: श्री बालगोविन्द प्रभुं तथा संस्कृतभारतीं धन्यवादं दद्म:।

अधुना संस्कृताध्ययनं करणीयम् एतस्य हेतुना इदं पाक्षिकं प्रारंभं कुर्म: । अस्माकं प्रयोजनं केवल संस्कृतेन मनोरंजनं नास्ति। वैदिकानां शास्त्रानां ज्ञान वितरणं च सनातनस्य संस्कृते:च संस्कृतभाषाया: प्रचार तथा आध्यात्मिक उन्नतीं अपि करणीयं एनेन हेतुना एनया पत्रिकया सह भवत: अग्रे उपस्थित:स्म:। अस्माकं वेदेषु पुराणेषु इतिहासेषु च उन्नत जीवनस्य तत्वानां ज्ञानसागर: अस्ति । सर्वेषां संप्रदायानाम् आचार्या: संस्कृते एव टीका: कृतवन्त:। अत: एव यदि वयं संस्कृत भाषायां कुशल: भविष्याम: तर्हि शास्त्रानां आकलनं आचरणं च जीवन व्यापनं च सुलभं भविष्यति।

## संभाषण




## कथा

पुरा किल जरासंधो नाम कोऽपि एकः क्षत्रियः आसीत् । सः दुरात्मा महावीरान् क्षत्रियान् युध्दे निर्जित्य स्ववेश्मनि निरुध्य मासि कृष्णचर्तुदश्यां एकैकं हत्वा भैरवाय तेषां बलिम् अकरोत् । तेन बहवः क्षत्रियाः कारागृहे स्थापिताः तस्मिन् शासति न कोऽपि सुखं प्राप्तवान । सर्वे धार्मिकाः तस्य राज्यं त्यक्त्वा अन्यत्र गताः । श्रीकृष्णः तस्य वधमिच्छन् तस्य राजधानीं गतः ।

एवं सकल जनपद क्षत्रियवधे दीक्षितस्य तस्य दुष्टाशयस्य वधं अभिकाङ्क्षान् श्रीकृष्णः भिमार्जनासहितः तस्य गृहं विप्रवेषेण प्रविवेश । सः तु तान् वस्तुतो विप्रान् एव मन्वानो दण्डवत् प्रणम्य यथोचितम् आसनेषु समुपवेश्य मधुपर्कदानेन् सम्पुज्य धन्योऽस्मि कृतकृत्योऽस्मि किमर्थ भवन्तो मद्गृहाम् आगताः तदवक्तव्यम् । यद् यद् अभिलाषितं तत्सर्वं भवता प्रदास्यामि इति उवाच । तद् आकर्ण्य भगवान श्रीकृष्णः प्रहसन् पार्थिवं तं अब्रवीत् । भद्र वयं कृष्ण-भीमार्जुनाः युध्दार्थं समागताः । अस्माकं अन्यतमं द्वन्द्वयुध्दार्थं वृणीष्व इति । सोऽपि महाबलः तथा इति वदन् द्वन्द्वायुध्दाय भीमसेनं वरायामास । अथ भीमजरासंधयोः भीषणं मल्लयुध्दं पंचविंशति त्रासरान् प्रवर्तते स्म । अन्ते च भगवान देवकीनन्दनेन सम्बोधितः सः भीमसेनः तस्य शरीरं द्विधा कृत्वा भूमौ निपातयामास । एवं बलिष्ठं जरासन्धम् पाण्डुपुत्रेण घातयित्वा तेन कारागृहीतान् वार्थिवान् वासुदेवो मोचयामास । तेऽपि तं भगवन्तं बहुधा स्तुवन्तः स्वान् स्वान जनपदान् प्रतिपेदिरे ।

## विनोदः




उष्ट्राणां च गृहे लग्नं गर्दभाः मन्त्र पाठकाः। परस्परं प्रशंसन्ति अहो रूपं अहो ध्वनि:॥

अर्थ-उष्ट्रः कदापि सुंदरः नास्ति। गर्दभस्य ध्वनि कदापि मधुरः नास्ति अतः तयोःपरस्पर प्रशंसा मिथ्या अस्ति । तावत अस्मिन् लोके अपात्राः जनाः केवल इन्द्रिय प्रित्यार्थ परस्परं प्रशंसन्ति ।

## प्रहेलिका

| | | | | | |
|---|---|---|---|---|---|
| ■ | १ | | | ■ | ८ |
| २ | | ■ | ■ | ७ | |
| | | ■ | ६ | ■ | |
| | ■ | ४ | | | ■ |
| | ■ | ५ | | | |
| ३ | | | ■ | ९ | ■ |

दिगंतसम शब्द -१. सरोवरः/जलाशय २.मासस्य पंचादश दिनानाम् समुह ३.यवनस्य भार्या ४. कृष्णस्य एकं नाम ५. स्वर्ण ७. आकाश ९. न-नकारर्थ

ऊर्ध्व शब्द - १.एषः सर्पःपरीक्षितं दंश कृतवान् २. संरक्षणार्थम् ४.विष्णोः एकःस्त्री अवतार ६.दिनस्य अष्टम् अंश/त्रिणि घंटा ८. अमङ्गल ९. लक्ष्मी

## सुभाषित

अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

अनुवाद- कृपणाः जनाः एतत मम तत् अन्यस्य इति चिन्तयन्ति किन्तु उदाराः जनाः पूर्ण विश्वं मम परिवार अस्ति इति चिन्तयन्ति ।

प्रकाशनं मुद्रणं च संकेत- धीरशांत दासः, कनाई कृष्ण दासः,पाक्षिकः संस्कृतप्रभातम्, हरे कृष्ण चौक, ५० गोकुलनगरे कोंढवा - पुणे-४८ अणुपत्रम् संकेत sanskritprabhatam@gmail.com. d16108@gmail.com, भ्र.ध्व.-८८८८८४४६४८/९४२३२३४४३ 